ISSN 0976-559X

# वागीश्वरी

## संस्कृतविभागीया वार्षिकी शोधपत्री

संख्या - १४

UGC Approved Peer Reviewed Multilingual Research Journal

संस्कृतविभागः

असम विश्वविद्यालयः, शिलचरः

आङ्ग्लाब्दः - २०१९

# *Contents*


- कविवाङ्निर्मितिः कविप्रतिभा च - एका समीक्षा —ड० रातुल बुजरबरुवा 1
- Kalidasa's Environmental Awareness as Reflected in His Meghadutam —Dr. Kamal Lochan Atreya 6
- वेदकालिकशिक्षाव्यवस्था - एकं विश्लेषणात्मकमध्ययनम् —डॉ. छबिलाल उपाध्यायः 11
- A Study on *Kauṭilīya Arthaśāstra* and *Goods and Services Tax* (GST) – 2017: An Interface —Dr. Snigdha Das Roy 16
- Concept of *Sandhānakarma* (Plastic Surgery) in the Light of *Suśrutasaṁhitā* —Hiten Barman 26
- A Study on the Society as Revealed in the *Ṛgveda* —Bhrigu Rajkhowa 35
- वराकोपत्यकाया: बङ्गभाषिसमाजे परिलक्षिता विवाहविधि —Susmita Purkayastha 40
- কৌটিল্য বর্ণিত ন্যায় ব্যবস্থার পর্যালোচনা —ছপিকুল মিঞা 45
- Concept of liberation in Yoga philosophy —Nitu Mani Roy 51
- A Study on some Females of the Mahābhārata: An inspiration to Modern Woman —Jnanashree Devi 60
- A Study of Society and Culture as reflected in the Aitareya Brāhmaṇa —Biswajit Rudra Paul 72
- योगदर्शने समाधिलाभाय ईश्वरस्वरुपम् — Kanchan Barman 84
- याज्ञवल्क्यस्मृतेः व्यवहाराध्याये विहङ्गमदृष्टिरेका —Shanti Pokhrel 91

# कविवाङ्निर्मितिः कविप्रतिभा च - एका समीक्षा

ड० रातुल बुजरबरुवा

कस्यचिदपि ग्रन्थस्य निर्विघ्नपरिसमाप्तये मंगलाचारणं कर्त्तव्यमिति संस्कृतकाव्यपरम्परा। अलंकारशास्त्रस्यापि प्रारम्भे तत्कर्त्तारः मंगलाचरणम् आचरन्ति। मम्मटः स्वकीयग्रन्थस्य काव्यप्रकाशस्य प्रारम्भे इष्टदेवतां स्तौति-

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।[१]

मंगलाचरणेऽस्मिन् मम्मटेन नियतिकृतकर्मणः कविकृतकर्मणः च महत्वं सुचारूतया प्रतिपादितमस्ति। तदनुसारं नियतिकृतसृष्टेः कविसृष्टेः च महदन्तरं प्रदर्शितं भवति। मम्मटस्य मतानुसारं कवेः सृष्टिकर्म ब्रह्मसृष्टिकर्मणोऽपि गरीयसी। वस्तुतस्तु काव्यप्रकाशस्य मंगलाचरणे मम्मटेन कवेः सृष्टेर्दक्षता स्वीकृता। कवेः सृष्टिस्तु नियतिकृतनियमात् स्वतन्त्रा आह्लादप्रदायका नवरसयुक्ता भवति। दृश्यते यत् करुणरसात्मककाव्यादपि काव्यजनितनिर्मलानन्दमेव सम्भवति। अतः मम्मटानुसारं कवेः सृष्टिः सदैव ह्लादैकमयी अर्थात् सर्वत्र आनन्दमयी वर्तते। तत्र दुःखमोहयोः लेशमात्रमपि अवकाशो न दृश्यते। महाकवीनां नवनवोन्मेषशालिप्रज्ञारूपा वाणी सहृदयान् विशेषेण चमत्कुर्वन् अलौकिकमेवानन्दं जनयति। ध्वन्यालोके प्रतीयमानार्थालोचनावसरे कालिदासादीनां महाकवीनां वाक् लोकोत्तराह्लादजनकत्वात् अलोकसामान्यं स्वीक्रियते।[२] काव्यामृतेन सहृदयेषु आनन्दानुभूतिरूपः चमत्कारः समुत्पद्यते। कवेः या कल्पना सा तु कविप्रतिभानिःसृता सती सहृदयान् परमाह्लादं वितरति।

कुन्तकेन काव्यस्य प्रयोजनालोचनावसरे कटुकौषधवत् काव्यम् अज्ञानरूपरोगस्य विनाशकरमिति स्वीकृतम् -

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम्।।[३]

कुन्तकस्याशयः यत्काव्येन आनन्दानुभूतिरूपचमत्कारः समुपजायते अर्थात् काव्यनिर्माणस्य मुख्यं प्रयोजनं सहृदयहृदये आनन्दोत्पादनमस्ति। भरतमुनिना नाट्यं सर्वेषां मनोरञ्जनाय एकं साधनमस्ति इति स्वीकृतम्-

विनोदजननं लोके नाट्यमेतद् भविष्यति।।[४]

---

*संस्कृतसाहित्यविभागाध्यक्षः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी*

ब्रह्मणः सृष्टिः त्रिगुणात्मिका वर्तते, सत्व-रज-तमो गुणमयी। ब्रह्मनिर्मितिः सदैव सुखदुःखमोहस्वभावा। नियतिकृताः सर्वे पदार्थाः नियतेः विधानस्याधीनाः, जरामरणादिविषयं निश्चितमेव वर्तते। परन्तु कविसृष्टचरित्रं तु नियतेः विधानस्य बहिर्भूतमस्ति। विधातृसृष्टं इदं जगत् स्वतन्त्रम्, उपादानादिकारणपरतन्त्रमेव। कविकर्म समवायि-असमवायिकारणं च न अपेक्षते।

संसारेऽस्मिन् नियतिनिर्मितौ असम्भावितमपि सम्भावितं भवति यदा सुनिपुणः कविः स्वकीयां कवित्वमयीं गिरां प्रयोजयति। तद्गिरया दुःखार्त्त-श्रमार्त्त-शोकार्त्तजनेषु सुखानुभूतिप्रदानाय अपारं बलं प्रदीयते। तस्मादपि कविवाङ्निर्मितिः नियतिनिर्मितिमतिक्रम्य वर्तते। कवेर्वाणी तु लोकोत्तराह्लादप्रदातुं शक्यते। जगन्नाथेन काव्यलक्षणनिरूपणप्रसङ्गे काव्यार्थजन्यरमणीयतायाः स्वरूपं प्रदत्तम् - "रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता"। यस्य ज्ञानेन अलौकिकाह्लादः प्राप्यते सोऽर्थः रमणीयो भवति।

लोकोत्तरवर्णननिपुणकविकर्मणः रसास्वादनं मुख्यं प्रयोजनम्। भारतीयकाव्यप्रसङ्गे रसस्य सर्वोत्कृष्टत्वं गीयते। कवेः रचना नवरसैः सुशोभिता वर्तते। परिणतप्रज्ञानां कवीनां प्रवृत्तिः रसेन परिचालिता भवति। ब्रह्मणः निर्मितौ मधुरादयः षड् रसाः भवन्ति। नियतिसृष्टाः मधुर-अम्लादयः केचन रसाः तृप्तिप्रदायकाः, तिक्तादयः केचन रसास्तु तद् विपरीताः। एवं ब्रह्मनिर्मितेरपेक्षया कविनिर्मितिः सदैव गरीयसी।

आनन्दवर्धनानुसारं कविरेक सृष्टिकर्त्ता प्रजापतिर्वा। कवये यथा रोचते तदिच्छाऽनुसारं विश्वमिदं भिन्नभिन्नरूपेण परिवर्तते-

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते।।[६]

निखिले काव्यजगति कविरेक निर्मातृरूपेण स्वीक्रियते। स्वकीयसृष्टिविषये कविः कस्यापि अधीनः न भवति। यदि कवेः शृङ्गाररसे अनुरक्तिरस्ति तत्र तत्कृतकाव्यं सर्वदा शृङ्गाररसयुक्तं भवति। यदि असौ तद् विपरीतोऽस्ति सर्वमेव निरसं भवति।

शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्।।[७]

कविः स्वकीयाभिप्रायेण चेतनपदार्थम् अचेतनरूपेण आचरति, अचेतनपदार्थं च चेतनवत् आचरति -

भावानचेतनानपि चेतनवच्चेतनानचेतनवत्।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया।।[८]

दृश्यते यत् कविकर्मणि यदलौकिकं रसरूपमाह्लादप्रदायकत्वं तत्तु कविप्रतिभायाः फलम्। प्रतिभायाः लक्षणं रुद्रटेन प्रदत्तम् - 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता'। 'अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा' इत्येवाभिनवगुप्तेन प्रोक्तम्। प्रसिद्धालंकारिकः व्यक्तिविवेककारः महिमभट्टोऽपि प्रतिभायाः तात्पर्यं स्वीकरोति। कविः प्रतिभाबलादेव कालविशेषस्य सर्वे पदार्थाः समानरूपेण द्रष्टुं शक्नोति। सा प्रतिभा भगवतो तृतीयः नेत्रसदृशः -

रसानुगुणशब्दार्थचिन्तास्तिमितचेतसः।
क्षणं स्वरूपस्पर्शोत्था प्रज्ञेव प्रतिभा कवे।।
सा हि चक्षुर्भगवतस्तृतीयमिति गीयते।
येन साक्षात्करोत्येष भावांस्त्रैकाल्यवर्तिनः।।[९]

महाकवीनां कृतिषु अतिवैचित्र्यतया प्रयुज्यमानः व्यञ्जकशब्दः व्यङ्गयार्थः च उपलभ्यते। महाकवयः विशेषप्रतिभया जगतः प्रत्यक्षज्ञानेन काव्येषु इदृशं शब्दम् अर्थ च प्रतिपादयन्ति। पण्डितराजजगन्नाथानुसारेण काव्यस्य कारणं तु कविगता प्रतिभा एव वर्तते। सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः[१०]। मम्मटेन यत् शक्तिपदेनाभिधीयते तदेव जगन्नाथेनादृष्टशब्देन अभिधीयते। प्रतिभायाः कारणरूपेण लौकिक-अलौकिककारणं उभयमपि मन्यते। लौकिककारणरूपेण तु व्युत्पत्यभ्यासरूपं ज्ञायते। अलौकक-कारणं तु देवतामहापुरुषप्रसादादिजन्यम् अदृष्टरूपं सूच्यते। अतः मम्मटः काव्येषु कारणं तु लौकिककारणमेव स्वीकरोति, न तु अदृष्टरूपम् अलौकिककारणं स्वीकरोति। काव्यप्रकाशे प्रतिभा च शक्तिपदेन सूच्यते- 'शक्तिश्च कवित्वबीजरूपः संस्कारविशेषः, प्रतिभाऽपरपर्याया, यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात्' इति मम्मटः। आनन्दवर्धनानुसारेण प्रतीयमानोऽर्थं एव लोकोत्तराह्लादप्रदायको भवति -

सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।।[११]

अन्नेभ्यो विसदृशं प्रतिभाविशेषं महाकवीनां स्वकीयवैशिष्ट्यमेव प्रकाशयति। अभिनवगुप्तेन 'लोचन' इत्याख्ये व्याख्याने प्रतिभासन्दर्भे स्वमतं प्रकाशितम् -

यदुन्मीलिनशक्तयैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्।।

अत्रेयं प्रतिभा विश्वस्य उन्मीलनहेतुत्वेन, शिवात्वेन (परमशिवत्वमेव प्रतिभात्वमिति), शक्तिरूपेण च कल्पिता।

'सरस्वती' इति शब्दस्य स्थाने अभिनवगुप्तः 'वाक्' शब्दं व्यवहरति 'सरस्वतीति वाग्रूपा (वाग्+रूपा) भगवतीत्यर्थः' इति। वस्तुतस्तु प्रज्ञैव भगवती सरस्वती। याऽपूर्व वस्तुनिर्माणक्षमा

सैव प्रतिभा। काव्यकारणनिरूपणावसरे आचार्यदण्डी प्रकाशयति यत् काव्योत्कर्षसाधनस्य त्रीणि कारणानि भवन्ति-

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।[१२]

नैसर्गिकी प्रतिभा पूर्वजन्मसंस्कारसिद्धा भवति। विविधशास्त्राणां समुचिताध्ययनेन उपार्जितं निर्मलं ज्ञानमेव काव्यरचनाय परिगण्यते। यदा काव्योत्पत्तिकारणभूतस्य असामान्यज्ञानस्य पुनः पुनः अभ्यासः क्रियते तदा काव्यकारणतां प्राप्नोति। दण्डिमतानुसारेण प्रतिभारहितोऽपि पुरुषः शास्त्रज्ञानेन अभ्यासेन च सरस्वत्याऽनुगृहितो भवति। तथाहि-

न विद्यते यद्यपि पूर्ववासना गुणनुबन्धिप्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।।[१३]

रुद्रटमते प्रतिभायाः सहजा उत्पाद्या इति भेदद्वयमस्ति। तद्यथा-

प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विविधा भवति।
पुंसा सहजातत्वादनयोस्तु ज्यायसी सहजा।।[१४]

मम्मटेन काव्यनिर्माणार्थं प्रतिभाव्युत्पत्यभ्यासाः तु काव्यस्य कारणरूपेण स्वीक्रियन्ते-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे।।[१५]

प्रतिभारूपा शक्तिः, लोकशास्त्राणां समुचिताध्ययनेन समुपार्जिता व्युत्पत्तिः तथा काव्यविरचनस्य प्रयासः अभ्यासो वा इत्येते काव्यनिर्माणस्य त्रीणि कारणानि भवन्ति।

कविप्रतिभाविकाशाय औचित्यमपि अन्यतमं गुरुत्वपूर्णं कारकमस्ति। वस्तुतस्तु काव्यस्य ये शोभावर्धकाः रसगुणालंकारादयः कारकाः सन्ति ते सर्वे एव औचित्याश्रिताः भवेयुः। अनौचित्ये काव्यस्य काव्यत्वहानिर्भवति इति मत्वा काव्ये औचितस्य उपयोगिता क्षेमेन्द्रेण औचित्यविचारचर्चायां प्रतिपादिता। औचित्यस्य स्वरूपमुन्मीलयेति वक्रोक्तिजीवितकारः-

यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना।
आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते।।[१६]

यस्मिन् काव्ये वक्तुः वाचकस्य वा, श्रोतुः वा अत्यन्तशोभायुक्तेन धर्मेण अभिधेयं वस्तु आच्छाद्यते तदपि औचित्यमिति उच्यते। आनन्दवर्धनस्य मतेन काव्यस्य सकलानि महत्वपूर्णतत्वानि औचित्यस्यान्तर्भुक्तानि भवन्ति। तन्मतेन रसभङ्गस्य कारणं भवति अनौचित्यम्। उक्तं च आनन्दवर्धनेन-

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्य रसस्योपनिषद्पर।।[१७]

यदि अनौचित्यं विहाय रसभङ्गस्य किमपि कारणं नास्ति तर्हि औचित्यमेव रसोत्कर्षसाधकरूपेण स्वीक्रियते। अत एव काव्ये रसभङ्गं प्रतिभासम्पन्नः कविः सर्वथा परिहरति।

एवं कविनिर्मितेः महत्वं विविधकाव्यशास्त्रेषु समुद्घोषितमस्ति। दृश्यते यत्काव्यशास्त्रकाराः कविनिर्मितौ प्रतिभामेव प्रधानसहायिकारूपेण स्वीकुर्वन्ति। प्रतिभाबलेन कवेः निर्मितिः अपारे काव्यसंसारे समुज्वला वर्तते।

<u>सन्दर्भसूत्राणि</u> -

१. काव्यप्रकाशः, १/१
२. सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।। - ध्वन्यालोकः, १,६
३. वक्रोक्तिजीवितम्, १.७
४. नाट्यशास्त्रम्, १.११९
५ रमणीयार्थप्रतिपादकः शब्दः काव्यम् - रसगंगाधरः, १.१
६. ध्वन्यालोकः, ३,पृ.५५१
७. तत्रैव, ३, पृ. ५५१
८. तत्रैव, ३, पृ. ५५१
९. व्यक्तिविवेकः, २.११७-११८
१० रसगंगाधरः, पृ. २७
११. ध्वन्यालोकः, १.६
१२. काव्यादर्शः, १.१०३
१३. तत्रैव, १.१०४
१४ काव्यालंकारः, १.६
१५. काव्यप्रकाशः, १.३
१६. वक्रोक्तिजीवितम्, १.५४
१७. ध्वन्यालोकः, तृतीय-उद्योते

<u>ग्रन्थपञ्जी</u>

१. आनन्दवर्धनप्रणीतः ध्वन्यालोकः, सं-बदरीनाथ शर्मा, सप्तम संख्या, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१८
२. कुन्तकविरचितं वक्रोक्तिजीवितम्, सं-परमेश्वरदीन पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१४.
३. गरीयसी, सं-चन्द्रप्रकाश शइकीया, साहित्य प्रकाश, फरवरी, २००२.
४. जगन्नाथप्रणीतः रसगंगाधरः, सं-बदरीनाथ झा, चौखम्बा विद्याभवन, वाराणसी, २०१८.
५. दण्डिप्रणीतः काव्यादर्शः, सं-जमुना पाठक, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००८.
६ मम्मटप्रणीतं काव्यप्रकाशम्, सं-सत्यनारायणशास्त्री खण्डुरी, चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१६.